# सामवेदे स्तोभः लक्षणं स्वरूपश्च

**आशीषमिश्रः**
**वरिष्ठानुसन्धाता**
**संस्कृत संवर्धन प्रतिष्ठानम्**

सामगाने ऋगतिरिक्तः प्रयुज्यमानः वर्णः स्तोभः कथ्यते। सामवेदस्य लक्षणग्रन्थेषु स्तोभस्य स्वरूपस्य विस्तृतं विवरणं प्राप्यते। सर्वप्रथमं संहि.ब्रा. इत्यस्मिन् स्तोभस्योल्लेखः स्पष्टरूपेणाभवत्। एवञ्च कथितमस्ति यत् स्तोभः साममोनि ऋचि कुत्रापि न भवति। किन्तु सामगाने सर्वत्र प्रवृत्तो भवति। तत्र स्तोभस्य विशेषणस्वरूपे सर्वत्र गताः शब्दस्य प्रयोगः कृतः वर्तते। यस्याभिप्रायोऽपि सायणानुसारं सर्वासु देवतासु व्याप्तं भवितव्यम्। यतो हि स्तोभ सर्वस्यै देवतायै प्रयुक्ते साम्नि दृश्यते। अतः एषः सर्वासु देवतासु व्याप्तः वर्तते। सूत्रगतं सर्वत्र निवृत्ताः एवञ्च सायणाचार्येणाभिप्रायं द्वयमवगतमस्ति। प्रथमोऽभिप्रायः इत्थमस्ति यत् आर्चिकसंहितायां सर्वत्र न प्राप्ते सति गाने सर्वत्र तस्य प्रवृत्तिः प्रवर्तते। सायणानुसारं द्वितीयः अभिप्रायः इत्थमस्ति यत् उच्चारणविधौ तथा अध्ययनविधौ सर्वेषु पदेषु च सः भिन्नरूपेण आदौ अन्ते च दृश्यते। किन्तु साम्नः प्रयोगसमये सर्वेषु पदेषु तेषां प्रवृत्तिर्भवति। सायणः स्वकीये द्वितीयप्रमाणे स्तोभानुसंहारं विवेचितवान्। यस्मिन् स्पष्टरूपेण कथितं यत् विधागीतेषु स्तोभः आदौ तथा अन्तिमे दृश्यते। किन्तु सामगाने प्रत्येकं पादे ततः ग्रहणं क्रियते। जैमिनिना स्वकीयमीमांसासूत्रे स्तोभस्य लक्षणं प्रतिपादितम्। तत्र लिखितं यत् ये वर्णाः ऋचि अविद्यमानाः भवन्ति तेषाम् एव नाम स्तोभः अस्ति । जैमिनेः न्यायमालाविस्तरे तस्य मतं माधवाचार्यः स्वीकृतवान्। सायणानुसारं केवलं कालक्षेपाय प्रयु क्तः शब्दराशिः एव स्तोभ इति। सामवेदस्य प्रातिशाख्यग्रन्थे, स्तोभानुसंहारे तथा अक्षरतन्त्रे केवलं स्तोभानामेव विस्तरेण विवेचनं कृतमस्ति। अक्षरतन्त्रे स्तोभाय अक्षरशब्दः परिभाषिकरूपेण गृहीतोऽस्ति। तस्मिनक्षरस्य पारिभाषाविषये स्पष्टरूपेण कथितं यत् ये वर्णाः ऋचि न सन्ति, परन्तु साम्नि प्रयुक्ताः वर्तन्ते ते एव स्तोभाः कथ्यन्ते। स्तोभानुसंहारस्य परिशिष्टानुसारं यत् किमपि वारद्वयं कथितं सः शास्त्रचिन्तकैः स्तोभः मन्यते।

**स्तोभस्य भेदाः** **(1) सार्थकः** **(2) निरर्थकः**

## सार्थकस्तोभः

अर्थवान् शब्दः सार्थकस्तोभः भवति। यथा नृम्णे, निधीमहि, अनिष्टपति, आदि। अर्थात् ये सामयोनि ऋक् मध्ये भवन्ति। उपरिष्टात् आनीतः भवति एवञ्च गानस्याङ्गं भवति। कतिपयानां साम्नां नामानि स्तोभपदानामाधारेण प्राप्तानि भवन्ति। यथा – **भ्राज-साम, शुक्र साम,** आदि।

**अग्न आयूंषि पर्वसे** (साम.६२७)

ऋक् मध्ये यत् साम गीयते तत् इत्थं प्रकारकं वर्तते ।

२ १ २ र १
**भ्राजा ( द्विः) भ्राजाऽ३१उ। वाऽ२। ए। भ्राज। (द्वे त्रिः)।**[1]

अस्मिन् साम्नि भ्राजपदस्य आवृत्तिः अत्यधिका वर्तते। एतत् पदं यदि सामयोनि ऋचि च भवेत् चेत् साम्नि गीतं जातम्। अस्य भ्राजस्वरूपस्य सार्थकशब्दस्याधारेण साम्नः नाम भ्राज-साम वर्तते।

[1] आ0 – ६/१/२५५

## निरर्थकस्तोभः

येषां वर्णानां प्रयोगः पदस्वरूपे भवति, तथा येषां कश्चित् शाब्दिकार्थः न भवति। यथा – **ए, इ, उ, हाउ, औहोयि, औहोवा , इत्यादि। अयोहाइ। पवोहाइ। पवस्वैनावसूनि।** उपर्युक्ते श्नौष्टसोममध्ये **अयोहाइ, इयोइया, इया औहोवा,** एतानि पदानि प्रयुज्यन्ते। एतानि पदानि निरर्थकानि तथा च निरर्थकस्तोभाः वर्तन्ते ।

## स्तोभानामाधारेण सामगानस्य प्रकारः

सामाध्ययनेन ज्ञायते यत् एतेषां स्तोभानां सामगाने महत्त्वपूर्णा भूमिका वर्तते। स्तोभदृष्ट्या सामगानस्य प्रकारः त्रिधा वर्तते- **(1) छन्नः (2) लेशः तथा (3) आविः।**

**ऋग्विहीनं छन्नगानं लेशं स्तोभमृचा सह।**
**आविर्गानं स्तोभहीनम् एवं गानं त्रयो विदुः।।**[2]

### (१) छन्नः

सामगानस्य तद् रूपं यस्मिन् सामयोनिं विना ऋचः स्तोभानामेव गानं क्रियते। तद् गानं छन्नगानं कथ्यते। अस्मिन् प्रस्तावतः प्रारभ्य निधनपर्यन्तं सर्वा भक्तयः स्तोभे भवन्ति। गानसंहितायाम् एतेषां साम्नां संख्या स्वल्पा वर्तते। एतस्याः एतत् वैशिष्ट्यं यत् सार्थके तथा निरर्थके उभयोः प्रकारकयोः स्तोभयोः छन्नगानं लभते। यथा –

१ - १ २ १ - १ २ १ -
**पाती ऽ२ (त्रिः)। दिवआ। पाती ऽ२ (त्रिः) अन्तरिक्षा। स्या। पाती ऽ२।**
१ २ १ - २ १ २र १
**पार्थिवा। स्या । पाती ऽ२ (त्रिः)। अपामोषधी। नाम्। पाती ऽ२ (त्रिः)।**[3]

एतत् गानं निरर्थकस्तोभपदेषु कृतमस्ति। निरर्थकगाने चतसृणां गानसंहितानां गानमुपलभ्यते यत् आरण्यगानसहितायां सङ्कलितमस्ति। एतान् निरर्थकशब्दान् लक्ष्यीकृत्य सम्प्रति लोकव्यवहारे निरर्थकशब्दाः प्रयुज्यन्ते ।

### (२) लेशः

सामगानस्य तद् रूपं यस्मिन् ऋगक्षरैः सह सार्थकानां तथा निरर्थकानां स्तोभानां गानं क्रियते। तथा केषुचित् सामसु प्रत्येकं पादेषु स्तोभानां गानं क्रियते। अनेन प्रकारेण लेशगाने स्तोभस्य भेदः द्विधा वर्तते। (1) पदस्तोभः तथा (2) पादस्तोभः। लेशगानस्योदाहरणम् – **ओग्नाई (सा० – १)**

### पदस्तोभः

सामगानसमये ऋचः एकं पदं पदद्वयं प्रत्येकं पदं वा तथा च इत्येतेभ्यः अधिकं सार्थकशब्दानां निरर्थकशब्दानां च गानं क्रियते, तदेव स्तोभपदेन कथ्यते। यथा – **इन्द्र क्रतुं न आ भर।**

---

[2] सामसंहिता-भूमिका

[3] आरण्यक गान- अर्क पर्व-३९

अस्मिन् साम्नि इन्द्रपदस्मात् परम् **औहो**, क्रतुं न आभर पिता **औ** एतेभ्यः पदेभ्यः परम् **औहो**, पुत्रेभ्यो यथा शिक्षा इत्येभ्यः पदेभ्यः परम् **औहोवा** एते स्तोभाः विद्यमानाः वर्तन्ते। अतः एतत् पदं स्तोभस्योदाहरणमस्ति।

## पादस्तोभः

सामगाने ऋचः एस्मात् पदात् पूर्वं वा पश्चात् येषां व्यतिरिक्तसार्थकपदानां तथा च निरर्थकपदानां गानं क्रियते तानि पदानि पादस्तोभानि कथ्यन्ते। यथा- **त्वामिद्धि हवामहे**। ऋक्-मध्ये यत् सामगानं जातं ते निम्नप्रकारेण सन्ति–

४र ५रर ररर४५ १२
**त्वामिद्धिहवामहे। सातौवाजोवा। स्याकारवः।**[4]

उपर्युक्ते साममध्ये प्रत्येकं पादात् परम् आ । औहोवा हाउवा । ऊपा । एतेषां स्तोभानां गानमभूत्। अतः एतत् पादस्तोभस्योदाहरणमस्ति। पदस्य पादस्य च स्तोभयोः प्रत्येकं भेदद्वयं वर्तते। (क) **अन्वयी तथा (ख) अनुषङ्गी।**

## (क) अन्वयी –

पदात् तथा पादात् पूर्वं गीयमानः स्तोभः अन्वयी भवति । यथा –

**१ २र १ २ १र १ २ १ २ १र २ र**
**हो। होइ। अक्रान्त्समुद्रः प्रथमेविध। मान्। हो। होइ । जनयन्प्रजा भुवनस्य गो।**
**२र**
**पाः। हो। होइ। वृषा पवित्रे अधिसानो अ । व्याइ। हो। होइ। बृहत्सोमो**
**वावृधेस्वानो अ। द्रा। औ होवाहोउवा। ए ऽ ३। स्वानो आ। द्री २३४५।**[5]

अक्रान्त्समुद्रः अस्मिन् ऋक् मध्ये एतत् साम। होइ स्तोभस्य गानं प्रत्येकं पादात् पूर्वं कृतमस्ति । पादात् पूर्वं स्तोभस्य गानं कृतमस्ति अतः **हो। होइ।** स्तोभः अन्वयस्तोभः कथ्यते ।

## अनुषङ्गी स्तोभः

अनुषङ्गी-स्तोभः ऋक् इत्यस्मात् पूर्वम् एवञ्च पादात् परं गीयते। यथा – **सघायस्ते** सामयोनि ऋक्-मध्ये यत् गानं कृतं जातमस्ति तस्मिन् प्रत्येकं पादात् परं स्तोभः दृश्यते।

**सघायस्ता ऽ ३ इ। ए। दिवोनरा ऽ३। ए। धियामर्त्ता ऽ३ । ए स्यशमता ऽ३। ए।**[6]

अस्मिन् साम्नि **'ए'** स्तोभः ऋचः प्रत्येकं पदात् परं गानमभवत् अतः एष आनुषङ्गीस्तोभः वर्तते। एवं प्रकारेण आ नो मित्रावरुणा तथा ऋक् मध्ये कृते गाने पादस्तोभः वर्तते। अतः एष आनुषङ्गीपादस्तोभयुक्तं साम वर्तते ।

---

[4] इन्द्र पर्व – ३७९

[5] पवमान - १०३०

[6] ऐन्द्र गान ६२१

**(3) आविः**

आविर्गाने स्तोभस्य सर्वदा अभावः वर्तते। अस्मिन् गाने केवलं सामयोनिऋचः एव गानं क्रियते। उदाहरणम्- **आवोराजा** (सा-११३)

**स्तोभस्य अन्यः भेदः**

सामयोनि-ऋचायाः यदा गानं क्रियते तदा कदाचित् वर्णस्य कदाचित् पदरूपस्य तथा कदाचित् पादरूपस्तोभस्य गानं क्रियते। एतेषां वर्णरूपाणां, पदरूपाणां तथा पादरूपस्तोभानां दृष्ट्या स्तोभस्य त्रयः भेदाः वर्तन्ते ।

**(१) वर्णस्तोभः (२) पदस्तोभः (३) वाक्यस्तोभः।**

१. **वर्णस्तोभः**

यस्मिन् स्तोभे केवलम् एकस्य वर्णस्य प्रयोगोऽभूतम् सः वर्णस्तोभः कथ्यते। यथा – अ, इ , ए, उ, ओ चेत्यादयः। वर्णस्तोभः निरर्थकः भवति। '**सघायस्ते सुदानवे**' ऋक् मध्ये यत् गानमस्ति तस्मिन् प्रत्येकं पादे 'ए' स्तोभः विद्यमानो वर्तते यः निरर्थकः अस्ति।

२. **पदस्तोभः**

यस्मिन् स्तोभे सार्थकस्तोभः तथा निरर्थकस्तोभः पदरूपे प्रयुज्यते तत् पदस्तोभः कथ्यते। **हाइ, हाउ, औहोइ** इत्यादयः निरर्थकशब्दाः तथा च **चन्द्रः**, **सूर्यः भ्राजः** चेत्यादयः सार्थकशब्दाः च पदस्तोभाः उच्यन्ते। यथा – अग्निंदूताम्

**अग्निदूताम्। वृणीमहाइ। होतारा ऽ२३० वी। श्ववेदसाम्। अस्यया ऽ२३ ज्ञा। आ।**
**औ ऽ३ होवा। स्यासुक्रतुम्। इडा ऽ २३ भा ऽ३४३। ओ ऽ२३४५ इ। डा।**

अस्मिन् गाने **औहोवा, ओइ**, एते निरर्थकपदस्तोभाः वर्तन्ते। इत्थं प्रकारेण सार्थकपदस्तोभाय **भ्राजसाम** स्पष्टीकर्तुं शक्यते।

(३) **वाक्यस्तोभः**

येन स्तोभेन विभिन्नार्थः भावः च प्रयुज्यते सः वाक्यस्तोभः कथ्यते। एते नवधा वर्तन्ते - (**१) अशस्तिः, (२) स्तुतिः, (३) संख्यानम्, (४) प्रलयः, (५) परिवेदनम्, (६) प्रैषः, (७) अन्वेषणम्, (८) सृष्टिः (९) आख्या नं च। स्तोभानुसंहारे** अशस्तिः, स्तुतिः चेत्ययोः लक्षणं विवेचितमस्ति। एतेषां वाक्यस्तोभानां नामभिः इत्थं प्रतीयते यत् एते विविधा विषयकाः वर्तन्ते। एतेषु सार्थकनामस्तोभेषु क्रमशः **निन्दा, स्तुतिः, संख्या, प्रलयः, परिवेदनं, प्रैषः, अन्वेषणं, सृष्टिः** चेत्यादीनामाख्यानानां विवेचनं कृतम् अस्ति । श्रीधरशरत्चन्द्र- पराञ्जपेमहोदयः भारतीयसङ्गीतस्येतिहासनामके ग्रन्थे स्तोभस्य त्रयाणां भेदानामुल्लेखं कृतवान्। किन्तु तेन वाक्यस्तोभस्य कमप्युदाहरणं न प्रदत्तम्।

ऋगतिरिक्तवर्णानामर्थो भवति वा न अस्मिन् विषये मतभेदः दृश्यते। सामान्यरूपेण तस्य कोऽपि अर्थो न विद्यते। किन्तु स्तोभाक्षराणामपि स्वकीयमुद्देश्यमस्ति। एवञ्च एतत् निरुद्देश्यं नास्ति। गानसमये ऋगक्षराणां मध्यवर्त्याः अन्तरालं संपूर्य सामगानं प्रभावपूर्णं भवेत्, इत्यस्योद्देश्यमस्ति। एवं प्रकारेण अस्यां परिस्थित्याम् एतं निरर्थकं कथं वक्तुं शक्यते । यतो हि देवान् प्रसन्नार्थं सामगानं गीयते। अतः सामगानेन प्रभावोत्पादकतायाः प्रतीतिः भवति। एवञ्च देवतानामाभासः भवति। अतः संहितोपनिषद्ब्राह्मणस्य सर्वत्रगताः स्तोभाः इत्यस्यां व्याख्यायामाचार्यस्य सायणस्य कथनमस्ति यत् स्तोभः सर्वासु देवतासु व्याप्तः वर्तते। एतस्य समर्थनं कुर्वन् **बी. आर. शर्मामहोदयः** निगदति यत् स्तोभानामर्थं केवलं देवताः ज्ञातुं शक्नुवन्ति। स्तोभशब्दः स्तुत्यर्थको वर्तते। अर्थात् स्तुभधातुना सह '**घ**'

प्रत्ययस्य संयोगेन स्तोभः इति शब्दः निर्मीयते। **हो, हाइ, हाउ** चेत्यादयः निरर्थकशब्दा अपि ऋचां गायने स्वरपूर्वकमाह्लादकाराः भवन्ति। अत एव एतेनापि देवतानां स्तुतिर्भवति। अनेन हेतुना अस्य स्तोभत्वमन्वर्थकं सिद्धं भवति।

छान्दोग्योपनिषदि स्तोभाक्षराणां साम्नः अवयवस्वरूपेण उल्लिखितम् अस्ति । तत्र स्तोभस्य प्रशंसां कुर्वन् कथितम् यत् स्तोभाक्षराणां ज्ञानी वाण्याः बलं प्राप्य अन्नवान् भवति। स्तोभानां विभिन्नैः देवैः सह सम्बन्धोऽपि दृश्यते। हाउकार-स्तोभे ऋषिः अस्य लोकस्य दर्शनं करोति। 'हाइ' स्तोभे वायुः देवतास्वरूपं पश्यति। एवं प्रकारेण अथ स्तोभे चन्द्रमा, इत्यस्मिन् अग्निदेवतायाः कल्पना कृतास्ति। उकारे आदित्यः एवञ्च एकारे निहव तथा च औहोयिकारस्य सम्बन्धः विश्वेदेवा चेत्यनेन साकं निर्दिष्टमस्ति। तत्रैव प्रजापतिना देवता-हिङ्कार इत्युल्लेखितमस्ति।

जगतः सर्वासां सङ्गीतप्रणालीनां सूक्ष्मनिरीक्षणेन एवं ज्ञायते यत् स्तोभः यः वस्तुतः आलापप्रकारः वर्तते। एवञ्च सङ्गीतस्सर्वेषु प्रणालिषु अस्मिन् स्वरूपे प्राप्यते। आलापानां प्रयोगः कस्याञ्चित् स्वरावल्याः विशिष्टाविष्काराय क्रियते। आलापान् विना गेयवस्तु तु अचेतनं तथा मूलस्वरूपं भूयते। गायकः स्तोभानां प्रयोगेण तथा विविधस्वरसमूहानां माध्यमेन गानं प्रभावशालिं निर्मातुं साहाय्यं स्वीकरोति। एषः स्तोभः परम्परागतनिधिरस्ति। अस्य प्रयोगः ऋक्-पूर्वकालिनि सङ्गीतेऽपि जातमस्ति। डॉ. सूर्यकान्तमहोदयः स्तोभेषु प्राचीनतमस्य सङ्गीतस्य स्वरूपं दृष्टवानस्ति।